दिनाँक: - 28.07.2025

प्रात: - 06:55

<u>प्रधानमन्त्री - सिन्दूर</u>

प्रधानमन्त्री नरेन्द्रमोदी उक्तवान् यत्, आपरेशन्-सिन्दूर-अभियानेन विश्वाय प्रदर्शितं यत् यदि भारतस्य सार्वभौमत्वस्य उपरि आक्रमणं भवति तर्हि भारतस्य प्रतिक्रिया कथं भविष्यति । श्रीमोदी अवदत् यत् सैन्यकार्यक्रमेण देशे सर्वत्र नूतनविश्वासस्य भावः उत्पन्नः। सः तमिलनाडुराज्यस्य गङ्गैकोण्डचोलपुरे प्रतिष्ठितचोलराजस्य राजेन्द्रचोळ-प्रथमस्य जन्मदिवसस्य उत्सवे वदति स्म ।

प्रधानमन्त्री नरेन्द्रमोदी "एकभारतम् श्रेष्ठभारतम्" इत्यस्य प्रतीकरूपेण राज-राज-चोळस्य राजेन्द्रचोळस्य च योगदानानि विस्तारेण वदन् सांस्कृतिक-शिल्पकलाक्षेत्रेषु चोळसाम्राज्यस्य योगदानानां संस्तुतिं कृतवान् । श्रीमोदी अवदत्, राज-राज-चोळस्य_राजेन्द्रचोळस्य च नाम भारतस्य परिचयस्य, गौरवस्य च पर्यायः अस्ति।

प्रधानमन्त्रिणा उक्तं यत् चोळ-काले प्राप्ताः आर्थिकाः, सामरिकाः उन्नतयः, आधुनिकभारतस्य प्रेरणास्रोताः एव सन्ति । सः अवलोकितवान् यत् भारतेन चोळसाम्राज्यस्य समये वाणिज्यिक-उन्नतिम्, समुद्रीय-मार्गाणाम् उपयोगेन, कला-संस्कृतेः प्रचारेण च सर्वदिशि द्रुतगत्या प्रगतिः साधिता, यत् नूतन-भारतस्य निर्माणार्थं प्राचीन-मार्गचित्ररूपेण कार्यं करोति । श्रीमोदी प्रकाशितवान् यत् महान् राजा राजेन्द्रचोळः गङ्गैकोण्डचोलपुरम-मन्दिरस्य निर्माणं कारितवान्, यत् वैश्विकरूपेण वास्तुकला-विस्मयरूपेण अद्यापि मान्यतां प्राप्नोति । प्रधानमन्त्रिणा इदमपि घोषितं यत् भारतीय-इतिहास-संस्कृतौ तयोः योगदानस्य सम्मानार्थं तमिलनाडु-राज्ये चोल-सम्राट्-राजराजचोल-राजेन्द्र-चोला-प्रथमयोः भव्यप्रतिमाः अपि स्थापिताः भविष्यन्ति।

<u>प्रधानमन्त्री-मन की बात</u>

प्रधानमन्त्री नरेन्द्रमोदी गौरवं प्रकटितवान् यत् एकविंशतिशतकस्य भारते विज्ञानं नवीनशक्त्या प्रगतिशीलं वर्तते। आकाशवाण्याम्, स्वस्य मनकी बात, इत्यस्मिन् कार्यक्रमे राष्ट्रं सम्बोधयन् श्रीमोदी भारतीयवायुसेना-दलस्य दलनायकस्य शुभान्शु-शुक्लस्य अन्तरिक्षात् प्रत्यागमनस्य विषये उक्तवान्। सः अवदत् यत् अधुना बालाः विज्ञानस्य अन्तरिक्षस्य च विषये जिज्ञासां प्रकटयन्ति, अथ च अन्तरिक्षवैज्ञानिकाः भवितुम् महत्त्वाकांक्षां विकासयन्तः सन्ति ।

अस्य मासस्य प्रारम्भे दुबईनगरे आयोजिते अन्ताराष्ट्रियरसायनशास्त्रस्य ओलम्पियाड्-क्रीडायां त्रीणि स्वर्णपदकानि, द्वौ रजतपदके, एकं कांस्यपदकं च प्राप्य राष्ट्राय गौरवं प्रदातॄणां भारतीयछात्राणां प्रशंसाम् अकरोत्। प्रधानमन्त्रिणा उक्तं यत् भारतेन गणितजगति स्वस्थानं सुदृढं कृतम्। प्रधानमन्त्री सबलम् उक्तवान् यत् अग्रिममासे, मुम्बई-नगरे खगोलशास्त्रस्य अथ खभौतिकशास्त्रस्य ओलिम्पियाड् इति रसप्रश्नप्रितियोगिता भविष्यति यत्र हि प्रायः षष्ट्यधिकाः देशाः भागं गृह्णन्ति ।

<u>लोकसभा संचालन सिन्दूर</u> :

अद्य लोकसभायां ऑपरेशन सिन्दूर विषये चर्चा आरभ्यते इति अपेक्षा अस्ति। संसदीयकार्याणां मन्त्री किरेन् रिजिजुः सूचितवान् आसीत् यत् पहलगामनगरे आतङ्कवादीनां आक्रमणस्य विषये, सिन्दूर-कार्यक्रमस्य अन्तर्गतं भारतस्य प्रतिक्रियायाः विषये च विशेषचर्चा, प्रचलति मानसून-संसद-सत्रे भविष्यति । श्री रिजिजुः इत्यमुना उक्तं यत् लोकसभा-सभापतिः ओम बिर्ला इत्यस्य अध्यक्षतायां व्यापारपरामर्शसमित्याः संगोष्ठ्याम् एतस्य निर्णयः कृतः। सः अवदत्, लोकसभायां वादविवादाय षोडश होराः विनियोजिताः सन्ति, राज्यसभा श्वः षोडश होरासु चर्चां करिष्यति।

क्रीडा –

जार्जिया देशस्य बटुमि इत्यत्र प्रचाल्यमानायाम् (FIDE) एफ्.आई.डी.ई. महिला-चतुरंग-विश्व-चषक-क्रीडायां भारतीय क्रीडिके ग्राण्ड्-मास्टर कोनेरु हम्पी तथा दिव्यादेशमुखः च विजेतृ-निर्णयार्थं द्रुततरक्रीडायाम् स्पर्धिष्यतः ।

<u>क्रिकेट</u>

एण्डर्सन्-टेण्डल्कर-ट्रॉफीति-क्रिकेट-क्रीडायाः चतुर्थ-टेस्ट्-क्रीडायां इङ्ग्लैण्ड्-भारतदेशौ सममूल्यतां प्राप्तवन्तौ, येन श्रृङ्खला जीविता अभवत् । आतिथेयः इङ्ग्लैण्ड्-देशः द्वे-एकम् इति अंक-अन्तरालेन अग्रेअस्ति।